श्री० षडा-पद्धतिः १

ॐ नमः श्रीपरमात्मने ॥ अथातः संप्रवक्ष्यामि श्रीषडाक्षरपद्धतिम् ॥ नत्वापदाम्बुजद्वंद्वंतदी
॥१॥ यंसंशयापहं ॥१॥ श्रीवरदंपूर्वमुद्धृत्य आचार्य्येतितदन्तरं ॥ षडाक्षरमहामन्त्रोधर्म्मका
मार्थसिद्धिदं ॥२॥ मनोन्तरंच ॥ सौंकारंश्रीपदंपूर्वंवरदेतितदंतरं ॥३॥ न्तार्य्येतियतःपश्चा
देवमष्टाक्षरंभवेत् ॥३॥ अष्टाक्षरमिदंप्रोक्तंतन्त्रेमिप्रायवेदिभिः ॥३॥ नेतस्यग्रहनेशोनोपरा
गादिचारयेत् ॥ नारिष्टादिकंदोषंसद्यःसिद्धेन्मन्त्रधक् ॥४॥ पुत्रहीनोलभेत्पुत्रंदरिद्रोध
नमाप्नुयात् ॥ यंयंचिंतयतेकामंतंतंप्राप्नोतिमंत्रतः ॥५॥ अथमूलमन्त्रः ॥ श्रीवरदार्य्येति
व्याख्यातमनेन ॥ ॐ श्रीवरदार्य्यायनमः श्रीवरदार्य्याय इतिवा ॥ अस्यश्रीवरदार्य्यम
हामन्त्रस्यश्रीभगवान्वेदव्यासऋषिरनुष्टुपछन्दः ॥ श्रीवरदार्य्यादेवता ॐबीजं श्रीश
क्तिः वरेतिकीलकं सर्वाभिष्टसिद्ध्यर्थंजपेविनियोगः ॥ ततोऽङ्गन्यासकरन्यासौमूलवद्व्याख्यातम् ॥६॥

न्तरः ॥ कुर्वन्नकल्मषोभूत्वाव्रजेत्श्रीपतिमंदिरं ॥७॥ श्रीभगुवेनमः वेतितर्जन्यांभ्यां
नमः रेतिमध्यमाभ्यांनमः देत्यनामिकाभ्यांनमः चेतिकनिष्ठिकाभ्यांनमः आर्य्येतिकर
तलकरपृष्ठाभ्यांनमः अथषडङ्गन्यासः श्रीहृदयायनमः वेतिशिरसेस्वाहा रेतिशि
खायैवौषट् देतिकवचायहुं चेतिनेत्राभ्यांवौषट् आर्य्येतिअस्त्रायफट् अथव्याख्यो
तमनेनकरांगन्यासौ ॐश्रीमगुवेत्यादिएवं ॐश्रीहृदयायनमइत्यादि अथध्यान
म् ॥ इंदीवरदलश्यामंशुक्लक्षोमाम्बरावृतं ॥ किरीटवलयाद्यंगंभूषणैरुपभूषितं ॥
७॥ स्वर्णसिंहासनेसंस्थंप्रसन्नवरदश्रीपं ॥ शितनागरुणापांगंवीक्षणामृतवर्षिणं ॥
८॥ ध्यायेदेवंप्रसन्नाभंपूजयेद्वेहिनादिने ॥ यन्त्रंसंपूज्यवरदंतदग्रेपूजयेत्पुनः ॥९॥
गायत्रीप्रपठन्विष्णोश्चतुर्विंशतिवर्णिकां ॥ सहस्रशीर्षंप्रपठनुपचारैस्तुषोडशैः

॥१०॥अथवरदाचार्य्यगायत्री॥कृष्णायविद्महेदामोदरायधीमहितन्नोविष्णुःप्रचोदयात्॥
॥२॥ यन्नोद्धारस्तुकर्त्तव्योयन्नशास्त्रानुसारतः॥षट्दलेकमलेकृत्योत्कर्णिकाकेशरान्विते
॥११॥वह्निभूपूरसंयुक्तंपुनःप्रणववेष्टिते॥दलेवर्णेसुसंलिख्यमध्येनारंतुविन्यसेत्॥१२॥
भूर्जपत्रेलिखेयंत्रंजगद्वश्यंकरंपरं॥श्रीखण्डकुंकुमेनापित्वतीयारोहिणीयुता॥१३॥
यदास्यात्खेखणंवास्यविधेयंनान्यदाकचित्॥भक्त्याग्रेकलशंन्यस्यजलपूर्णंसपल्लवं
॥१४॥मूलेजलान्विनिक्षिप्यदीपंकुम्भोपरिन्यसेत्॥तदग्रेनुगणाधीशंहेरंबंपूजयेत्सुधीः॥१५॥
सूर्य्यादिकान्ग्रहान्शास्त्रादिदिग्पालाश्चप्रपूजयेत्॥पार्षदान्वेनिमादिश्चदेवान्सर्वान्प्रपूजयेत्॥१६॥
नीराजनंततःकुर्य्याच्चतुष्पथाविधानतः॥१७॥नीराजनं
पुराप्रोक्तंजगन्नाथेनस्वामिना॥दत्वाश्रीवरदाचार्य्यसच्चक्रेभाषयाविधिं॥१७॥भाषा

मूलेजगन्नाथदेवेनेदंप्रकाशितं॥आज्ञारूपमनेनैवकुर्य्यान्नीराजनंहरेः॥१८॥आरति
श्रीवरदाचार्य्यआर्य्यकीपूर्णमनोरथकरेसभनकी॥नैननिरखनहिंपलुवरषतउच
रतजयजयश्रीगिरधरकी१ध्रुववरदेनप्रगटप्रह्लादकीसनविभीषनश्रीरघुवरकी॥
मानिनिमानकरनरसरासकीश्रीरामानुजभाष्यकारकी॥२॥प्रफुलितवदनसदाद्विजव
रकीकथाकीरतनश्रीभागवतकी॥श्रीनित्यानंदश्रीचैतन्यश्रीनिम्बादित्यश्रीश्रीपति
श्रीएधावल्लभकी॥३॥जयश्रीहितयुतश्रीवल्लभकीश्रीरुक्मिनीपतिश्रीसियाकंतकी
॥श्रीहरेरामप्रभुव्रजजीवनकीनाएयनमुनिश्रीकुंजभवनकी॥४॥श्लोकप्रबंधेच॥वि
धात्रक्षेत्रक्षेसुखवरध्रुवधामधवले स्वकीयेधर्म्मिश्रीगिरिधरनिरीक्षसुकरुणं॥वि
राजनंनीराजनमसुघटंपूर्णसुखदं जगत्कामावर्षश्रीवरदतवपादाम्बुजयुगम्॥९॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

ध्रुवापश्रीव्यंदनुन्नप्रह्लादपराशरणं नतायोनीक्षेरक्षोधिपनिलयनाथापनिलयं॥दृद्धा
तःश्रीरघुवरनिरिक्षस्वकरुणम् जगत्कामावर्षंश्रीवरदतवपादाम्बुजयुगम्॥२॥न
वेन्द्रारण्येशुंपुलिनेमानिनिगनेदधन्मानंरासेरसविरसभावैकनिलयः॥अका
षीद्योभाष्यंरमानुजकृताचार्य्यवपुषा जगत्कामावर्षंश्रीवरदतवपादाम्बुजयुगम्॥
३॥प्रोक्तासद्वृत्तनाम्बुजद्विजवरैस्संकीर्त्यमानाकथा श्रीप्रपन्नगवतीयशास्त्रविहिता
श्रीनित्यदानंददा॥चेतन्यामृतमानिनश्चभानुशरणाधोनिभृत्योःपतेर्गोयन्तीविपुलं
विदेहतनयापत्युर्यशःपावनम्॥४॥एतन्नीलजनंरमहरेर्व्रजपतेःपरं॥नारायणमुनेश्चै
श्रीकुंजभवनालये॥गायंतिशान्तःशतनंविशंतिपरमंपदम्॥५॥इतिश्रीगोपदेयाचार्य्यकृ
तार्थपञ्चाक्षरपङ्क्तौमंत्रयन्त्रोद्धारःप्रथमोध्यायः॥१॥एमएमएमएमएमएमएमएमएमएम

श्रीरामचंद्रायनमः॥भाषाप्रबन्धरूपावाचतुष्पद्याःक्रमेणतु॥विस्तरार्थनिचयंयत्न
कैश्चिन्नदर्शितं॥१॥भारतीति॥भातेस्यस्यान्नजनितनापशूनवनार्थीक्विपेयंश्रीघ्र
प्रसादजननायकौस्तरणंस्वरूपावस्थानेनाविर्भूतेत्यर्थः॥उक्तञ्चपाद्मे॥द्वापरांतेक्रि
यारूपास्वरूपावस्थितानुया॥सैवजातास्वरूपेणस्तरणंकामभिवर्षिणी॥२॥श्रीवरदा
चार्य्येति॥वरंधर्मार्थकाममोक्षानन्ददतियः सत्वासावाचार्य्यश्चेतिसः श्रीमाश्चा
सौवरदाचार्य्यश्चेतितथा उक्तंश्रीमद्भागवते नववरदवरान्घ्रेणाश्रियेहाप्यनंगार्थं
ह्यविमुनिभिरशन्कैरादरेणाहृलीये॥यदिरचितधियंमोविधत्तेकोपविद्धं जग
तिनगमावेतत्त्वत्परानुग्रहेण॥३॥आर्य्येति॥ऋगतौधातुस्तोरयत् ऋच्छति सर्व
त्रांतर्यामीतयाव्याप्नोतीत्यार्य्यः श्रेष्ठइत्यर्थः अर्य्यएव आर्य्यकः ननःसुधातोः करो

त्यर्थलिच् आर्यकयतीत्यनशिशेलिनिः अर्यकीत्यापपाठः अर्य्यः रुगनाविनिधानोर्य
॥४॥ न् अर्य्यः स्वामी अर्य्यः स्वामीवैश्ययोरितिकोशात्॥ सकलजगत्स्वामीत्यर्थः तनस्वा
र्थेकअन्यत्सर्वंपूर्ववत् अथवाभागवतीशक्तीएव्योनस्याःकंसुखंतद्स्यास्तीतिसः॥
पूर्णमनोरथकरेसभवरकीर्तिपूर्णःमनोरथोएषांतेकेश्वएश्वइश्वरश्वभश्वनरा
श्चतेषांसप्राहारहंहुःकरेशभवरंकल्याणःविभूतिःइःकामःशशंभुःभगवाः
नएश्वनेचतेषांकंसुखंतद्स्यास्तीतिसःनराइत्यन्येषामुपलक्षणंअन्येषांब्रह्मादि
स्तंभपर्यन्तानांपूर्णमनोरथकर्तीत्यर्थः॥उक्तंच॥स्रष्टाजीवनिकायंसःपालयत्यखि
लंपुनःसंहृत्यजठरेसर्वंशेतेनन्तासनोहरिः॥१॥एकोहरिःत्रिधाभूतःसंज्ञयारु
पभेदतः॥अजःस्रजतिभूतानिहरोहरतिवैपुनः॥२॥पालनेकंपरेविष्णुर्जगत्स्वामी

जनार्दनः॥३॥नयननिरषनहीयसुखवर्षनउच्चरनजयजयेति॥नयतीतिनयनःतस्
संबोधनेहेसकलप्रापकएतेनजगत्प्राप्तत्वमागतम्संहृतत्वंदर्शयन्नाह॥हेनीरषन्नी
रेसीदतिनीरषनसर्वंमुदरीकृत्यरेसीदसितथाभूतअकारप्रश्लेषः अहीयेधेदः नही
यतेतीनोभवसि अहीयः तत्संबोधनेहेतथाभूत हीनत्वे पापाचरणेनैवभवति॥भवो
न्सर्वव्यापीआत्मापिपापाद्याचरणशून्यःनहीनोभवसि उक्तंचश्रुत्याएषआत्माअपह
तपाप्माइति अपहतपाप्मत्वादिगुणवान् ननुकथंनिर्गुणेमयिगुणारोपःक्रीयतेतत्रा
ह॥अनन्तकल्याणगुणोनियदादिव्यावहारादिकत्वात् अतएवाव्ययःमायागुणानि
र्मितेजगतिसर्वथावर्तमानोपिननन्तासेभवतोनासः उक्तंचस्वेनैवनैनंछिन्दंतिशस्त्रा
णिनैनंदहतिपावकः॥नचैनंक्लेदयत्यापोनशोषयतिमारुत इत्यनेनपालकत्वंफलितम्॥

सुखवर्षेनेति अत्रनकारःलिपिप्रमादेनकारः सुखंचतुर्वर्गसुखंवर्षतिसःतत्संबोधनेहे
तथाभूत जयजयेति जयजयशब्दरवोप्सातत्रपदस्यद्विर्भावे सर्वोत्कर्षेनवर्तताम्नित्यर्थः
जयोह्यत्रसर्वोत्कर्षेणवर्तेतम्॥ उक्तंचश्रीभरतेन॥जयजयजघ्नाभजितदोषजगत्प्रभो
जगुणोत्वमसियदात्मनासमवरुद्धसमस्तभगः॥भगजगदेकसाम्रविलेशरक्त्यवबोध
कनेकुचिदजयात्मनाचरतोऽनुचरेन्निगमः॥१॥श्रीगिरिधरकृति॥श्रीमांश्चासौगि
रिर्गोवर्द्धनाचलःधरणेधरःश्रीगोवर्द्धनस्यधरःतस्यकंनदस्यास्तीतिसः नूनुगिरिंकुतो
दधारहरिरन्यथैवव्रजंकस्मान्नरक्षितवानसावित्याशंकायामाख्यायिका लंकांविज
यमाकांक्षन्ससेन्योहरिरागतः॥तीरंसुदन्वतोवीक्ष्यशतयोजनविस्तरं॥१॥दुस्तरंवीक्ष्य
जलधिंदध्रेक्रोधंचदुःसहं॥तीतोसुदन्वानगमद्बलिपाणिवाध्रुवः॥२॥वलिंनिवे

धनत्वानंमन्त्रनेबन्धनेऽकरोत्॥तानरेधावमानास्तेभूधरानयनोद्यताः॥३॥सर्वेद्या
नायसंभारान्संप्रतंबन्धनंह्यमूत॥कोपिगोवर्द्धनंधत्वागधन्यंधेश्रेष्ठमेत्युनः॥४॥वर्द्धना
रिनिधिंक्षिप्त्वागधन्नेप्रत्युवाचसः॥पादस्पर्शंशचाद्विष्णोरागतोभवनाहरे॥५॥
कथंविहायगन्तव्यमांदीनेहैकलंपथि॥ध्रुवंगोऽप्यागतस्तुर्णंरघुनाथंघनायकं॥
धि॥कथयामासतत्सर्वंभूधरेणयथोदितं॥उक्तंश्रीरामचंद्रेणावानरंवदतांवरं॥७॥
भूधरंयाहिकथयत्वमत्रमेवनेचर॥तावत्तिष्ठतुतत्रैवपुण्येवृन्दावनेघने॥८॥या
वन्नमावतारेसोकृष्णःप्रादुर्भविष्यति॥तदाधर्त्तास्मिनमगंशिरसोपरिभागवेति
नच॥९॥पालयित्वंदधारेत्यर्थः अतोगिरिधरेत्याख्याभगवतेत्वाना॥ध्रुववरदे
नेति ध्रुवश्चासौवरः ध्रुववर तंददति ध्रुववरदास्तेषांमिनः श्रेष्ठः ध्रुववरदेनः ध्रुव

MEMORIAL

वरदः अनुज्ञाः यस्मादित्यर्थो वा इणः श्रेष्ठेऽनुज्ञे चेति कोशात् उक्तं च स्कान्दे जीवनिकायं
॥६॥ सः पालयत्य वैपुनः संहत्यजठरे सर्वैरेतेऽनन्तासनोहरिः ॥ एकोहरिस्त्रिधाभूतः संज्ञ
याहृपभेदतः अजस्रजातिभूतानिहरेहरतिवैपुनः ॥२॥ पालनेकपरो विष्णुर्नगच्छापी
जनार्दनः ॥ अनुज्ञाः यस्मादित्यर्थो वा इणः श्रेष्ठेऽनुज्ञे चेति कोशात् अथवा भाषापदंधु
वायओनान पादायवरदेणः वरदानाद्यर्थः उक्तं च भागवते विदुः सपत्न्युदितपत्रिभि
रन्तिएतोवालोपिसन्नुपगतस्तपसेवनानि ॥ तस्माअदाद्ध्रुवगतिंगृणते प्रसन्नोदेव्यः
स्तुवंतिमुनयोयदुपर्य्यधस्तात् ॥१॥ प्रगटप्रह्लादकीर्त्ति ॥ प्रगटश्चासौप्रह्लादः प्रकृष्टो
हर्षस्तस्यकंसुखंनदस्यास्तीतिसः ईनन्तेनत् अथवाक्लादहर्षेभ्वादिस्मा दुणप्र
क्लादन्तीतिप्रक्लादकाःभक्ताप्रगताश्चतेतेषांश्रीर्लक्ष्मीःसर्वस्वमित्यर्थः ॥ लक्ष्मीरी

कारमुच्यत इतिकोशात् अथवाभाषापदंप्रगटनामप्रगतोयातः प्रक्लादकीप्रक्लादहेतो
र्यैःसउक्तंभागवते सत्यंविधातुंनिजभृत्यभाषितंव्याप्तिंचभूतेष्वखिलेषुचात्मनः ॥अ
दृश्यताऽत्यद्भुतरूपमुद्वहन्स्तंभेसभायांनमृगंनमानुषं ॥१॥ शरणंविभीषणःश्रीरघु
वरकीर्त्ति शरणंप्राप्तःविभीषणोयस्यशरणंविभीषणः श्रीमन्तश्चतेरघुवीराःश्रीर
घुवीराःतेषांकंसुखंतेनदस्यास्तीतिसचासौसः उक्तंचरामायणे ततोहृष्टमनारामोलक्ष्म
णंवाक्यमब्रवीत् ॥ विभीषणायमेचैकाराज्यंदत्तंपुरैवहि ॥१॥ इदानीमपिगत्वात्वं
कामयेविभीषणं ॥ अभिषेचयविप्रैश्चमन्त्रवद्भिःपितामह ॥२॥ मानिनीमानक
रणरसएसकीर्त्ति मानिनीजनानांगोपीनांमानकरणे तदर्थंरसएसः सर्वंसोसः तस्यकं
सुखंतदस्यास्तीतिसः उक्तंभागवते बाहुप्रसारपरिरंभकरालकोरुनिर्वीक्षणावलभनन

मैनखाग्रपाने:॥ इत्येवलोकरक्षितेत्रैलोक्यसुंदरीणामुत्तंभयन्नाह पतिरमयोचकार॥१॥
॥१॥ एवंभगवतःकृष्णाख्यस्यनामहात्मनः॥ आत्मानंमोचयिष्यंतिस्त्रियोऽन्याश्चपतिव्रताः
भुवि॥२॥ श्रीरामानुजभाष्यकारकीर्तिः श्रीयुक्तोरामानुजः श्रीकृष्णः भाष्यकरोनीति
भाष्यकारः तस्यकं सुखंतद्यस्यास्तीतिसःवासोसः भक्तरूपेणावतीर्णत्वात् उक्तंच रा
मानुजस्तुसेजानोमूलानोभवबन्धनात् अपनेतुंस्वरूपेनकृष्णस्यधरणीतले॥३॥
रामस्यानुजइतिषष्ठीतत्पुरुषात् रामादनुजइत्यर्थोवा अथवारामः बलरामः अनुजो
यस्येतिवा योहिरामावतारेऽनुजेः श्रीलक्ष्मणः सैवकृष्णावतारेऽग्रजोबलदेवोजात
इत्याशयात् अत्रचेतिहासः लंकाविजयमालोक्यसुप्रसन्नोयद्धरिः॥ स्वमानरंयवी
यांसंप्रोवाचवचनंहरिः॥१॥ भ्रातस्त्वयैवविजिताजंकाराक्षसपुंगवं॥ हत्वासमीहेसे

वांतेनैवसेव्योभवान्मम २ कृष्णावतारेश्रीमत्स्वमग्रजोभविताममतदासेवांप्रकुर्वन्ते
स्मनःस्यान्नवाव्यथा ३ सैवजगन्नीवान्नुद्धर्तुंरामानुजरूपेणावतीर्णइत्यर्थइतिदिक्॥
इतिश्रीचतुष्पदीव्याख्यायांश्लोपदेवाचार्यैकृतपूर्वार्द्धसमाप्तः॥ प्रफुल्लितवदनसदाद्विजवर
कीर्तिः प्रफुल्लितंचनंतत् अस्तीतिसन्तंचनंतत् प्रफुल्लितवदनसन्नेन द्विजवरेणकंतद्
यस्यास्तीतिसः तच्चुंबनेनेवांतस्यभक्तरूपेणावतीर्णत्वाद्धरेः प्रफुल्लितवदनसदैवेत्यर्थः
यद्यपिन्तीयान्नसापेक्षत्वात्॥ सापेक्षमसमर्थंवदितिसमासाभावः शंक्यःतथापि
नेवं आर्षत्वात् भवत्येवसमासः कथाकीर्तनंश्रीभागवतकीर्तिः कथायाःकीर्तनंतद्रूपंश्री
भागवतंतस्यकंतदस्यास्तीतिएवंभूतः सैवसर्वोत्तमोनीश्वरः परिपूर्णएवएवसाच्चिदा
नन्दः उक्तंचश्रीमद्भागवते यंप्रव्रजंतमनुपेतमपेतकृत्यंद्वैपायनोविरहकातरआ

नुहाव॥ पुत्रेतिनन्नयनयानरवाभिनेदुस्तेसर्वभूतहृदयंमुनिमाननास्मि॥१॥ यःस्वानु
॥२॥ भावमखिलश्रुतिसारमेकमध्यात्मदीपमतितीतिर्षतोतनोधं॥संसारिणांकरुणयाहपु
णेशुद्धेतंव्याससूनुमुपयामिगुरुंमुनीनां॥२॥ श्रीनित्यानन्देति नित्यःअखंडःआनंद:
श्रीमाच्चासौसःअखंडानन्दस्वरूपःभक्तरूपेणावतीर्णत्वात् उक्तंच नित्यानन्दस्वरूपे
णपावनेनजगद्गुरिः नष्टप्रज्ञंमेदमनिंपुनातिकलुषात्तयम॥३॥ श्रीचैतन्यइति श्रीमा
श्चासौचैतन्यः समायाविलासविलक्षितेऽपिनगतिचैतन्याभावाभावरूपइत्यर्थः जोई
जन्मसमासाद्यब्रह्मलोधर्म्मवर्त्मनि॥ वरदेशेहरिर्हीतिचैतन्यश्चेतनेतरम्॥४॥ श्री
निम्बादित्येतिरूढिःआख्यापरःपरीयश्चास्यनीमानन्देति नियमेनानन्दयतिसःसुद
र्शनस्यावतारोसौ उक्तंचभूमौजन्मसमासाद्यब्रह्मणास्यकुलेभले सुदर्शनस्यरूपो

सौनिम्बादित्यःसनातनः १ यदाकलौजनाःसर्व्वेभगवन्नावबोधितम् नदावतीर्य्यतनु
नेतन्वीभक्तिंमधुद्विषः २ निम्बवृक्षंसमासाद्यसतेपेदुस्तरंतपः तेजसाभानुसदृशो
यतोजातोसदृत्यसौ ३ अत्रचाख्यायिका एकदासौनीमानन्दःगार्हस्थ्यधर्म्मोपन्नःद
त्तिनआमंत्र्यभगवत्पूजनपाकादिकमकरोत् तावत्सूर्य्योस्तकालःसंप्राप्तःघटिका
द्वयावधिपरिमितःदत्तिमिहक्तंनैवोभोजनकालःनैवदत्तिमिभुज्यतेचास्मिन् नि
म्बवृक्षोपरिसूर्य्यमवष्टभ्यनेत्युक्तंभोस्वामिनएतावत्कालंनिम्बवृक्षोपरिभानुस्तिष्ठ
तिकुतोनभोजनकालः तेरपिदत्तंउक्तंचसत्यंभोनिम्बवृक्षोपरियदाभानुस्तिष्ठतितदा
यामाद्वयंदिनंकुतोनभोक्तव्यमस्माभिरितिभुक्तंतेनोनिम्बादित्यइत्याख्याप्रसिद्धा॥
श्रीपतिरिति श्रीयःलक्ष्म्यापतिःश्रीपतिरितिस्पष्टम्निखिलगुणस्तवलेनास्पदत्वा

नकथंभूतःसदृत्याकांक्षायामग्निमपदम् श्रीराधावल्लभकीर्तिराधावल्लभायेषांभक्ता
नांसेव्यत्वेनाश्रितत्वान्तेषांकविलासःसोस्यास्तीतिसः अथवाराधायाःश्रीलक्ष्यावल्ल
भःश्रीकृष्णःतद्रूपत्वात्तस्यकंसुखविहारादिकंतद्स्यास्तीतिश्रीपतेःसः जयश्रीतिज
यश्रीत्यकंपदं जयेस्यदैत्यानांविजयस्यश्रीःशोभायस्यसः अथवाजयन्तीतिजयाःदे
वाःतेषांश्रीःशोभायस्मात् सःसर्वेषांदेवानांश्रीशोभास्यदत्वात् अथवाजयेतिक्रिया
पदं सर्वोत्कर्षेनवर्त्तनामित्यर्थः श्रीहितयुतइतिसम्बोधनान्तमेतत् श्रीयःश्रील
क्ष्मीस्वरूपायाःराधिकायाःहितंहिताचरणेनेयुक्तःप्राप्तःतत्सम्बोधनेहेतथाभूत
अथवासमग्रीसमग्रासोवेत्यर्थःअथवा श्रीयःहितःहितकारीश्रीकृष्णस्तेयुतःयुक्तःभवि
ष्यमानःहितहरिवंशःसाक्षाच्छ्रीकृष्णमूर्त्तिर्भक्तरूपेणावतरिष्यमाणत्वात् तत्संबोध

नेहेतथाभूतजयसर्वोत्कर्षेनवर्त्तनामित्यर्थः वंश्यावतारोयंयुक्तंचजगन्मोहकरीमाया
वंशीतुभगवत्प्रिया यथासंमोहितास्तासन्गोपवध्वोऽरुदन्ने ॥१॥श्रीकृष्णस्या
धरंपीत्वापाययित्वावधूजनं उद्धर्तुंजगतोजातोहितहरिवंशरूपधृक् ॥श्रीवल्ल
भकीर्त्ति श्रीमन्नश्वतेभक्तागोपावल्लभाःतेषांकंतद्स्यास्तीतिसः अथवा श्रीश्चा
सौवल्लभानस्याःकंतद्स्यास्तीतिसः अथवा श्रीमांश्चासौवल्लभश्चेतिश्रीवल्लभः
कलौभविष्यमानोवल्लभाचार्य्यःसोपिभगवतोऽवतारःतस्यकंतद्स्यास्तीतिसः
वल्लिकुलाज्जनिर्यस्यश्रीवल्लभाचार्यस्येतिस्पष्टतरमुक्तत्वात् उक्तंच श्रीवल्ल
भंकृपानाथंजगन्मोहनमच्युतम् ॥मत्स्यकूर्म्मवराहादिरूपधारिनमव्ययम् ॥१॥भ
परञ्च श्रीवल्लभेतिवरदेतिदयापरेतिभक्तप्रियेतिभवजृंहनकोविदेति॥ नाथे

शिनागशयने निजगन्निवासेत्यालोचितं प्रतिपदं कुरुमेमुकुंदः ॥ श्रीरुक्मिनीपतिश्री
सिभावरकीर्ति एकंपदं समस्तम् श्रीरुक्मिनीपतिः श्रीसिभावरकीर्ति सिन्नम्वाकार्य
मर्थीनसरे श्रीरूपायारुक्मिण्याः पैम्वापतिः श्रीरुक्मिणीपतिः श्रीसिभावरकी
र्ति सिभानुजनकमालालजारल्यो अतोनास्त्यस्याव्यूत्पत्तिः सिभायाः श्रीजानकयावरः
श्रीसिभावरः तस्यकं वित्तासादिकं तदस्यास्तीतिसचासौरुक्मिणीपतिरित्येकेनार्थः
अथवा एकपदपक्षेश्रीरुक्मिणीपतेस्तुसेनार्थः कथितः श्रीसिभावरेत्यादिपदनाम
धीनाह ॥ श्रीश्चसश्चईश्चआश्च श्रीशेक्ष्मीश्रङ्कारकामब्रह्मानःतेषांवरः वरणंवरः
श्रैष्ठ्यं तदस्यास्तीतिसः सचासौसश्चेत्यर्थः अथवाश्रीसश्चश्रीयाशेनयायुक्तःसः
सर्वेशोबलदेवश्च ईश्चकामः ईकारउच्यतेकामईतिकोशात् तदवतारेप्रद्युम्नः आ

श्चब्रह्माउच्यतेतास्यानाच्छव्यमित्याशयात्वुच्चधिष्ठातुर्ब्रह्मणोऽश्रत्वात्सअभि
रुद्धः नचवासुदेवेतिपदान्नयीमित्वंनागतमतः साधुत्वमाहुरुवापेत्युणाव्यूत्पादि
तोवासुः सर्वमत्रथसतिसर्वत्रासावात्मरूपेणावसतिःवासुःसचासौदेवश्चेतिसमा
सेवासुदेवः तथाचस्मृतिः सर्वत्रासौसमस्तंचवसत्यत्रेतिवैयतः अतःसवासुदेवेतिवि
ग्रहःपरिगीयते ९ वसुदेवस्यापत्यमित्यपिवासुदेवः रुष्यंधकवृष्णिकुरुभ्यश्चेतिवा
सुदेवःइत्यपिव्यूत्पत्यान्तरम् अतोअश्वनेश्रीतेश्रीसिभाःबलप्रद्युम्नानिरुद्धवासुदेवाः
ननुवासुदेवास्योतेकुतःपाठःतत्राह श्रैष्ठ्यंत्वग्रतिपादनायतस्यान्तेपाठःकृतःतेषांवरं
श्रैष्ठ्यं तदस्यास्तीवासुदेवसस्चासौसश्चेत्यर्थः श्रीहरेरामप्रभुव्रजजीवनकीर्ति अर्थो
वसरेपथक्कृत्वार्थवर्णनंकार्यं श्रीहरेरामप्रभुरित्येकंव्रजजीवनकीर्त्येकंहरतिलो

॥१२॥ कवाथामितिहरेभक्तहृदयंश्रीमच्चतद्धृदयंहरः श्रीहरः तस्मिन् श्रीहरेआरमतेतामोद य
स्यसचासौप्रभुश्चेत्यर्थः अथवाश्रीश्चलक्ष्मीहराश्चगौरीहराश्चेश्वरस्वतीमाश्चमायाश्च
तासांप्रभवः विष्णुहरब्रह्महरयः तेषांव्रजतिप्राप्नोतिः वृन्दावनं श्रीहरेरमप्रभूनांव्रजस्त
स्यजीवनंतस्यकंसुखंतदस्यास्तीतिसः अथवा श्रीहरेरमइतिमहामन्त्रः सचभग
वत्स्वरूपंसचासौप्रभुःसचासौव्रजजीवनकोव्रजस्यजीवनंतस्यकंतदस्यास्तीतिसः
अथवा भाविनःकलौभक्ताः श्रीहरेरमः व्रजजीवनाख्याः तेपिभगवतोवनाराः ते
षांकंतदस्यास्तीतिसः नारायणमुनेश्रीकृष्णभवनकीर्तिनारायणश्चासौमुनिःनारायण
णमुनिएतेनतरोप्युपलक्ष्यते श्रीमच्चतकृष्णभवनंनारायणमुनेः श्रीकृष्णस्यश्री
यारधिकयायुक्तंकृष्णभवनेकंतदस्यास्तीतिसः बलदेवकृतांचैषाव्याख्यानार्थ

सम्मता विनोदकृत्सुकृतिनांकोपिजानातिबाक्पटुः ॥१॥ तेहिनीदिवसेचास्याव्याख्यायाश्रव
णंशुभम् धन्याश्चएवनिजानन्तिनरनिर्भरसागरम् ॥२॥ विघ्नार्थीकुरुतेविघ्नोधना
र्थीधनंवहु रोगार्तोमुच्यतेरोगैः कुमार्थ्योपिपतिंशुभम् ॥३॥ यंयंचिन्तयतेकाम
मन्तमाप्नोत्यसंशयम् भक्ताकलौभविष्यन्तिनानिशास्त्रार्थकोविदाः ॥४॥ तेषांमुदेकृ
तांचेयंभाषावेदार्थसम्मता नीरजनायकृष्णस्यकलेःकलुषहारिणी ॥५॥ पठच्छृन्व
न्नरःसद्योयातिनरभवनेहरेः सूचनक्रियतेचास्यावर्णोवर्ण्याःक्रमेणतु ॥६॥ षोडशश्री
पदंचात्रकीर्तिषोडशविश्रुतं ॥ जयत्रिकंद्विकंचात्रवरदस्येतिनिश्चितम् ॥७॥ वालश्च्या
श्चिनीवर्णोवर्णिनाहरिणास्वयं ॥ अत्रवर्णेविभागोहिकार्य्यकैश्चित्कथंचनः ॥८॥ आरतीति
पदंपूर्वंलक्ष्मीजनतनःपरं ॥ वरदेतिपुनर्ज्ञेयंचार्य्यंचाथसमुद्भवेत् ॥९॥ आर्य्यकीत्यपि

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

पूर्णेति मनोरथमनःपदं ॥ करे सभवरेत्युक्त्वा कीर्तिवर्णनतोऽयसेत १० नयनेति पदं नीरजनेति हृ
॥१२॥ दयसुखेति च ॥ वर्षेत्युच्चरतेति ततो नयनयेति पदं ततः ११ श्रीति गिरिधरकीर्त्युक्त्वा ध्रुवेति वरदेन पि प्रगटप्र
काशकीर्त्युक्त्वाशरनेति ततः परं १२ विभीषणपदं चोक्त्वा श्रीति रघुवरकीर्ति च ॥ मानिनीति पुनर्नीलक
नेति पुनः पदं १३ रसरसेति कीर्ति च श्रीमानुत्तुङ्गेत्यपि भाग्यकारेति कीर्ति च प्रकुञ्जिनवदनेति च १४
सदाङ्गिनवरेत्युक्त्वा कीर्त्यनेति च श्रीभागवतकीर्त्युक्त्वा श्रीनित्यानंदेत्यपि १५ श्रीचैतन्यपदं चो
क्त्वा श्रीति निवेति चैतन्यः दित्यकीर्त्यापति श्रीति रघावल्लभकीर्ति च १६ जैयं श्रीहिनयुतश्रीति नतु
नेति पुनः पदं कीर्ति श्रीरुक्मिनीति पतिश्रीसिभावरेति च १७ कीर्ति श्रीति हरेत्यसप्रभुव्रजपदं ततः
जीवनेति पदं कीर्ति नाथ्येत्यामुनीति च १८ श्रीकुंजभवनेत्युक्त्वा कीर्तिवर्णनतोऽयसेत् एवंचतुष्प
दीवर्णैः ग्रथितानुमिभिपुरा ई श्रीवोपदेवाचार्य्यकृतसंग्रहघटाक्षरपद्धतौ चतुष्पदीव्याख्यायां
इति